श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ सञ्चारपद्धतिः एकादशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सञ्चारपद्धतिः एकादशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्।
इति सीताऽपि यद्वृत्तिमियेष प्रणमामि ताम्॥ ११.१ ॥

शरदः शतमम्ब ! पादुके ! स्यां
समयाहूतपितामहस्तुतानि।
मणिमण्टपिकासु रङ्गभर्तुः
त्वदधीनानि गतागतानि पश्यन्॥ ११.२ ॥

त्वदधीनपरिक्रमो मुकुन्दः तदधीनस्तव पादुके ! विहारः।
इतरेतरपारतन्त्र्यमित्थं युवयोः सिद्धमनन्यतन्त्रभूम्नोः॥ ११.३ ॥

रजसा तमसा च दुष्टसत्त्वे
गहने चेतसि मामके मुकुन्दः।
उचितं मृगयाविहारमिच्छन्
भवतीमादृत पादुके ! पदाभ्याम्॥ ११.४ ॥

क्षमया जगतामपि त्रयाणाम्
अवने देवि ! पदावनि ! त्वयैव।
अभिगम्यतमोऽपि संश्रितानाम्
अभिगन्ता भवति स्वयं मुकुन्दः॥ ११.५ ॥

शिरसा भवतीं दधाति कश्चित्
विधृतः कोऽपि पदस्पृशा भवत्या।
उभयोर्मधुवैरिपादरक्षे !
त्वदधीनां गतिमामनन्ति सन्तः॥ ११.६ ॥

स्पृशतः शिरसा पदेन च त्वां
गतिमुद्दिश्य मुकुन्दपादुके ! द्वौ।
अवरोहति पश्चिमः पदात् स्वात्
अधिरोहत्यनघस्तदेव पूर्वः॥ ११.७ ॥

समयेष्वपदिश्य जैत्रयात्रां विविधान्तःपुरवागुराव्यतीतः।
नियतं मणिपादुके ! भवत्या रमते वर्त्मनि रङ्गसार्वभौमः॥ ११.८ ॥

निजसंहननप्रसक्तलास्यं
चरति त्वामधिरुह्य रङ्गनाथः।
पदरक्षिणि ! पावनत्वमास्तां
रसिकास्वादमतः परं न विद्मः॥ ११.९ ॥

पदयोरनयोः परस्य पुंसः
त्वदनुग्राह्यविहारपद्धतेर्वा।
शिरसो मणिपादुके ! श्रुतीनां
मनसो वा मम भूषणं त्वमेका॥ ११.१० ॥

कृपया मधुवैरिपादरक्षे ! कठिने चेतसि मामके विहर्तुम्।
मकुटेषु दिवौकसां विधत्ते भवती रत्नविसंस्थुलेषु योग्याम्॥ ११.११ ॥

चरणद्वयमर्भकस्य शौरेः
शरदम्भोरुहचातुरीधुरीणम्।
शकटासुरताडनेऽपि गुप्तं
तव शक्त्या किल पादुके ! तदासीत्॥ ११.१२ ॥

उत्तस्थुषो रङ्गशयस्य शेषात्
आस्थानसिंहासनमारुरुक्षोः।
मध्येनिशान्तं मणिपादुके ! त्वां
लीलापदन्यासससखीं प्रपद्ये॥ ११.१३ ॥

प्राप्ताधिकाराः पतयः प्रजानाम् उत्तंसितामुत्तमपादुके ! त्वाम्।
रङ्गेशितुः स्वैरविहारकाले संयोजयन्त्यङ्घ्रिसरोजयुग्मे॥ ११.१४ ॥

त्वयाऽनुबद्धां मणिपादरक्षे लीलागतिं रङ्गशयस्य पुंसः।
निशामयन्तो न पुनर्भजन्ते संसारकान्तारगतागतानि॥ ११.१५ ॥

व्यूहानुपूर्वीरुचिरान् विहारान्
पदक्रमेण प्रतिपद्यमाना।
बिभर्षि नित्यम् मणिपादुके ! त्वं
मुरद्विषो मूर्तिरिव त्रिलोकीम्॥ ११.१६ ॥

पदेषु मन्देषु महत्स्वपि त्वं
नीरन्ध्रसंश्लेषवती मुरारेः।
प्रत्यायनार्थं किल पादुके ! नः
स्वाभाविकं दर्शयसि प्रभावम्॥ ११.१७ ॥

कृपाविशेषात् क्षमया समेतां
प्रवर्तमानां जगतो विभूत्यै।
अवैमि नित्यं मणिपादुके ! त्वाम्
आकस्मिकीं रङ्गपतेः प्रसत्तिम्॥ ११.१८ ॥

उपागतानामुपतापशान्त्यै
सुखावगाहां गतिमुद्वहन्तीम्।
पश्यन्ति शौरेः पदवाहिनीं त्वां
निम्नेषु तुङ्गेषु च निर्विशेषाम्॥ ११.१९ ॥

सह प्रयाता सततं प्रयाणे प्राप्तासने संश्रितपादपीठा।
अलङ्घनीया सहजेन भूम्ना छायेव शौरेर्मणिपादुके ! त्वम्॥ ११.२० ॥

पदस्पृशा रङ्गपतिर्भवत्या विचक्रमे विश्वमिदं क्षणेन।
तदस्य मन्ये मणिपादरक्षे ! त्वयैव विख्यातमुरुक्रमत्वम्॥ ११.२१ ॥

सञ्चारयन्ती पदमन्वतिष्ठः सहायकृत्यं मणिपादरक्षे !।
मातस्त्वमेका मनुवंशगोप्तुः गोपायतो गौतमधर्मदारान्॥ ११.२२ ॥

त्वत्तस्त्रिविष्टपचरानसपत्नयिष्यन्
आरुह्य तार्क्ष्यमवरुह्य च तत्क्षणेन।
शुद्धान्तभूमिषु पुनर्मणिपादरक्षे !
विश्राम्यति त्वयि विहारवशेन शौरिः॥ ११.२३ ॥

विक्रम्य भूमिमखिलां बलिना प्रदिष्टां
देवे पदावनि ! दिवं परिमातुकामे।
आसीदतो दिनकरस्य करोपतापात्
संरक्षितुं पदसरोजमुपर्यभूस्त्वम्॥ ११.२४ ॥

त्वत्सङ्गमान्ननु सकृद्विधिसंप्रयुक्ता
शुद्धिं परामधिजगाम शिवत्वहेतुम्।
रङ्गाधिराजपदरक्षिणि ! कीदृशी सा
गङ्गा बभूव भवदीयगतागतेन॥ ११.२५ ॥

वृद्धिं गवां जनयितुं भजता विहारान्
कृष्णेन रङ्गरसिकेन कृताश्रयायाः।
सञ्चारतस्तव तदा मणिपादरक्षे !
बृन्दावनं सपदि नन्दनतुल्यमासीत्॥ ११.२६ ॥

मातः ! त्रयीमयतया चरणप्रमाणे
द्वे विक्रमेषु विविधेषु सहायभूते।
नाथस्य साधुपरिरक्षणकर्मणि त्वं
दुष्कृद्विनाशनदशासु विहङ्गराजः॥ ११.२७ ॥

पादावनि ! क्वचन विक्रमणे भुजानां
पञ्चायुधी कररुहैर्भजते विकल्पम्।
नित्यम् त्वमेव नियता पदयोर्मुरारेः
तेनासि नूनमविकल्पसमाधियोग्या॥ ११.२८ ॥

अक्षेत्रविद्भिरधिगन्तुमशक्यवृत्तिः
मातस्त्वया निरवधिर्निधिरप्रमेयः।

रथ्यान्तरेषु चरणावनि ! रङ्गसङ्गी
 वात्सल्यनिघ्नमनसा जनसात्कृतोऽसौ॥ ११.२९ ॥

संपद्यते समुचितं क्रममाश्रयन्त्या
 सद्वर्त्मना भगवतोऽपि गतिर्भवत्या।
ईष्टे पदावनि ! पुनः क इवेतरेषां
 व्यावर्तनस्य विषमादपथप्रचारात्॥ ११.३० ॥

रङ्गेश्वरेण सह लास्यविशेषभाजो
 लीलोचितेषु तव रत्नशिलातलेषु।
मध्ये स्थितानि कतिचिन्मणिपादरक्षे !
 सभ्यान् विशेषमनुयोक्तुमिति प्रतीमः॥ ११.३१ ॥

नित्यं पदावनि ! निवेश्य पदं भवत्यां
 निष्पन्दकल्पपरिमेयपरिच्छदानि।
शृङ्गारशीतळतराणि भवन्ति काले
 रङ्गेश्वरस्य ललितानि गतागतानि॥ ११.३२ ॥

भोगार्चनानि कृतिभिः परिकल्पितानि
 प्रीत्यैव रङ्गनृपतिः प्रतिपद्यमानः।
पश्यत्सु नित्यमितरेषु परिच्छदेषु
 प्रत्यासनं भजति काञ्चनपादुके ! त्वाम्॥ ११.३३ ॥

अन्तस्तृतीयनयनैः स्वयमुत्तमाङ्गैः
 आविर्भविष्यदतिरिक्तमुखाम्बुजैर्वा।
न्यस्यन्ति रङ्गरसिकस्य विहारकाले
 वारक्रमेण कृतिनो मणिपादुके ! त्वाम्॥ ११.३४ ॥

रङ्गेश्वरे समधिरूढविहङ्गराजे
 मातङ्गराजविधृतां मणिपादुके ! त्वाम्।
अन्वासते विधृतचारुसितातपत्राः
 स्वर्गौकसः सुभगचामरलोलहस्ताः॥ ११.३५ ॥

विष्णोः पदं गतिवशादपरित्यजन्तीं
लोकेषु नित्यविषमेषु समप्रचाराम्।
अन्वेतुमर्हति धृतामखिलैः सुरेन्द्रैः
गङ्गा कथं नु गरुडध्वजपादुके ! त्वाम्॥ ११.३६ ॥

भिक्षामपेक्ष्य दनुजेन्द्रगृहं प्रयातुः
गुप्त्यै गवां विहरतो वहतश्च दूत्यम्।
तत्तादृशानि चरणावनि ! रङ्गभर्तुः
त्वत्सङ्गमेन सुभगानि विचेष्टितानि॥ ११.३७ ॥

निर्व्यज्यमाननवताळलयप्रथिम्ना
निर्यन्त्रणेन निजसञ्चरणक्रमेण।
मृद्नासि रङ्गनृपतेर्मणिपादुके ! त्वं
दुःखात्मकान् प्रणमतां दुरितप्ररोहान्॥ ११.३८ ॥

नित्यं य एव जगतो मणिपादरक्षे !
सत्तास्थितिप्रयतनेषु परं निदानम्।
सोऽपि स्वतन्त्रचरितस्त्वदधीनवृत्तिः
का वा कथा तदितरेषु मितम्पचेषु॥ ११.३९ ॥

निर्विष्टनागशयनेन परेण पुंसा
न्यस्ते पदे त्वयि पदावनि ! लोकहेतोः।
स्वर्गौकसां त्वदनुधावनतत्पराणां
सद्यः पदानि विपदामपदं भवन्ति॥ ११.४० ॥

शरदुपगमकाले सन्त्यजन् योगनिद्रां
शरणमुपगतानां त्राणहेतोः प्रयास्यन्।
जलधिदुहितुरङ्कान्मन्दमादाय देवि !
त्वयि खलु निदधाति स्वं पदं रङ्गनाथः॥ ११.४१ ॥

स्पृशसि पदसरोजं पादुके ! निर्विघातं
प्रविशसि च समस्तां देवि ! शुद्धान्तकक्ष्याम्।

अपरमपि मुरारेः पूर्वमाभीरकन्या-
    स्वभिसरणविधीनामग्रिमा साक्षिणी त्वम्॥ ११.४२ ॥

प्रतिभवनमनन्ये पादुके ! त्वत्प्रभावात्
    विविधवपुषि देवे विभ्रमद्यूतकाले।
अभिलषितसपत्नीगेहयात्राविघातं
    ग्लहयति रहसि त्वां षोडशस्त्रीसहस्रम्॥ ११.४३ ॥

तटभुवि यमुनायाश्छन्नवृत्तौ मुकुन्दे
    मुहुरधिगमहेतोर्मुह्यतां यौवतानाम्।
शमयितुमलमासीच्छङ्खचक्रादिचिह्ना
    प्रतिपदविचिकित्सां पादुके ! पद्धतिस्ते॥ ११.४४ ॥

अधिगतबहुशाखान् मञ्जुवाचः शुकादीन्
    सरसिजनिलयायाः प्रीतये सङ्ग्रहीतुम्।
प्रकटितगुणजालं पादुके ! रङ्गबन्धोः
    उपनिषदटवीषु क्रीडितं त्वत्सनाथम्॥ ११.४५ ॥

मुनिपरिषदि गीतं गौतमीरक्षणं ते
    मुहुरनुकलयन्तो मञ्जुवाचः शकुन्ताः।
उषसि निजकुलायादुत्थिता दण्डकेषु
    स्वयमपि पदरक्षे ! स्वैरमाम्रेडयन्ति॥ ११.४६ ॥

यमनियमविशुद्धैर्यं न पश्यन्ति चित्तैः
    श्रुतिषु चुळकमात्रं दृश्यते यस्य भूमा।
सुलभनिखिलभावं मांसदृष्टेर्जनस्य
    स्वयमुपहरसि त्वं पादुके ! तं पुमांसम्॥ ११.४७ ॥

निधिमिव निरपायं त्वामनादृत्य मोहात्
    अहमिह मम दोषं भावयन् क्षुद्रमर्थम्।
मयि सति करुणायाः पूर्णपात्रे त्वया किं
    परमुपगमनीयः पादुके ! रङ्गनाथः॥ ११.४८ ॥

कमपि कनकसिन्धोः सैकते सञ्चरन्तं
    कलशजलधिकन्यामेदिनीदत्तहस्तम्।
अनिशमनुभवेयं पादुके ! त्वय्यधीनं
    सुचरितपरिपाकं सूरिभिः सेवनीयम्॥ ११.४९ ॥

परिसरमुपयाता पादुके ! पश्य मातः
    करणविलयखेदात् कान्दिशीके विवेके।
पुरुषमुपनयन्ती पुण्डरीकाक्षमग्रे
    पुनरुदरनिवासक्लेशविच्छेदनं नः॥ ११.५० ॥

सा मे भूयात् सपदि भवती पादुके ! तापशान्त्यै
    यामारूढो दिवमिव शुभैः सेव्यमानो मरुद्भिः।
सौदामन्या सह कमलया सह्यजावृद्धिहेतुः
    काले काले चरति करुणावर्षुकः कृष्णमेघः॥ ११.५१ ॥

सत्याल्लोकात् सकलमहितात् स्थानतो वा रघूणां
    शङ्के मातः ! समधिकगुणं सैकतं सह्यजायाः।
पूर्वंपूर्वं चिरपरिचितं पादुके ! यत् त्यजन्त्या
    नीतो नाथस्तदिदमितरन्नीयते न त्वयाऽसौ॥ ११.५२ ॥

अग्रे देवि ! त्वयि सुमनसामग्रिमैरन्तरङ्गैः
    विन्यस्तायां विनयगरिमावर्जितादुत्तमाङ्गात्।
दत्ते पादं दरमुकुळितं त्वत्प्रभावातिशङ्की
    देवः श्रीमान् दनुजमथनो जैत्रयात्रास्वनन्यः॥ ११.५३ ॥

पौरोदन्तान् परिकलयितुं पादुके ! सञ्चरिष्णोः
    व्यक्ताव्यक्ता वशिकविशिखावर्तिनी रङ्गभर्तुः।
वेलातीतश्रुतिपरिमळैर्व्यक्तिमभ्येति काल्ये
    विन्यासैस्ते विबुधपरिषन्मौळिविन्यासदृश्यैः॥ ११.५४ ॥

आसंस्कारात् द्विजपरिषदा नित्यमभ्यस्यमाना
    श्रेयोहेतुः शिरसि जगतः स्थायिनी स्वेन भूम्ना।

रङ्गाधीशे स्वयमुदयिनि क्षेप्तुमन्धं तमिस्रं
गायत्रीव त्रिचतुरपदा गण्यसे पादुके ! त्वम्॥ ११.५५ ॥

भवतीं परस्य पुरुषस्य रङ्गिणो
महिमानमेव मणिपादु ! मन्महे।
कथमन्यथा स्वमहिमप्रतिष्ठितः
प्रतितिष्ठति त्वयि पदात्पदं प्रभुः॥ ११.५६ ॥

तिथिरष्टमी यदवतारवैभवात्
प्रथमा तिथिस्त्रिजगतामजायत।
मणिपादुके ! तमुपनीय वीथिका-
स्वतिथीकरोषि तदनन्यचक्षुषाम्॥ ११.५७ ॥

अपारप्रख्यातेरशरणशरण्यत्वयशसा
ननु त्वं रङ्गेन्दोश्चरणकमलस्यापि शरणम्।
यया लभ्यः पङ्गुप्रभृतिभिरसौ रङ्गनगर-
प्रतोळीपर्यन्ते निधिरनघवाचां निरवधिः॥ ११.५८ ॥

तत्तद्वासगृहाङ्गणप्रणयिनः श्रीरङ्गशृङ्गारिणो
वाल्लभ्यादविभक्तमन्थरगतिस्त्वं मे गतिः पादुके !।
लीलापङ्कजहल्लकोत्पलगळन्माध्वीकसेकोत्थिता
यत्रामोदविकल्पना विवृणुते शुद्धान्तवारक्रमम्॥ ११.५९ ॥

सम्भवतु पादरक्षे ! सत्यसुपर्णादिरौपवाह्यगणः।
यात्रासु रङ्गभर्तुः प्रथमपरिस्पन्दकारणं भवती॥ ११.६० ॥

॥ इति श्रीपादुकासहस्रे सञ्चारपद्धतिः एकादशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥